नार॰सं॰ १

॥श्रीगणाधिपतयेनमः॥ शुभमस्तु॥ अथातोदष्टमेवर्षेजन्मतोवाद्विजन्मनां॥ राज्ञामेकादशेमौंजीबंधनंद्वादशे
विशां॥१॥ जन्मतःपंचमेवर्षेवेदशास्त्रविशारदः॥ उपनीतोयतःश्रीमान्कार्यस्तत्रोपनायनं॥२॥ बालस्यबलहीनो
पिशौर्याजीवोबलप्रदः॥ यथोक्तवत्सरेकार्यमनुक्तेनोपनायनं॥३॥ दृश्यमानेगुरौशुक्रेशाखेशेचोत्तरायणे॥ वे
दानामधिपोजीवःशुक्रोभौमोबुधःक्रमात्॥४॥ शशीग्रीष्मवसंतेषुशुक्लमासेतुद्विजन्मनां॥ मुख्यंसाधार
णेतेषांतपोमासादिपंचसु॥५॥ स्वकुलाचारधर्मज्ञोमाघमासेथफाल्गुने॥ विधिज्ञश्चार्थवांश्चैनवेदवेदांग
पारगः॥६॥ वैशाखेधनवांश्चैवेदशास्त्रविशारदः॥ उपनीतःकलाढ्यश्चज्येष्ठेविधिवतांवरः॥७॥ शुक्लेप
क्षेद्वितीयाचतृतीयापंचमीतथा॥ एकादशीचदशमीद्वादशीव्रतबंधने॥८॥ ज्येष्ठातुमध्यमाषष्ठीसप्तम्यथ
त्रयोदशी॥ आपंचम्यस्तुतिथयःपराःस्युरतिनिंदिताः॥९॥ श्रेष्ठान्यर्केत्रयांत्यस्थप्रवाङ्मादित्यत्तराणिच॥ विष्णु
त्रयाश्विमित्राद्यपोनिभान्युपनायने॥१०॥ जन्मभाद्दशमे१०कर्मसंघातर्क्षंतुषोडशी१६॥ अष्टादशं१८सा
मुदायंत्रयोविंशं२३द्विनाशनं॥ मानसंपंचविंशर्क्षं२५नाचरेत्शुभमेषुतत्॥११॥ आचार्यसौम्यकाव्यानांवाराःश
स्ताःशशिनयोः॥ वीरौतौमध्यफलदौचेतरौनिंदितौव्रते॥१२॥ त्रेधाविभज्यदिवसंतत्रादौकर्मदैवतं॥ द्वितीये

शिव १

मानुषं कार्यं त्तृतीये पैत्रकं तथा ॥ १३ ॥ ॥ ग्रंथांतरादंशज्ञापनार्थं वचनं ज्ञेयं ॥ ॥ दस्रादित्रित्रिऋक्षाणि राशीनां गणना भवेत् ॥ पादभेदाद्द्वादशानां राशीनां गणनाक्रमः ॥ १४ ॥ यस्मिन्पादे स्थितो खेटस्तत्पादात्तु नवांशगः ॥ द्वादशांशाश्च विज्ञेया राशेो राशेो यथाक्रमात् ॥ १५ ॥ स्वनीचगे तदंशे वा स्वारिभस्थे तदंशगे ॥ क्रूरांशगो वा शाखेशो महापातककृद्भवेत् ॥ १६ ॥ स्वोच्चसंस्थे तदंशे वा स्वराशौ मित्रभे तथा ॥ व्रती च धनवांश्चैव वेदवेदांगपारगः ॥ १७ ॥ शो परमोच्चगते जीवे शाखेवा तदंशगे ॥ शुक्रे वा चारसंयुक्ते स्वदाता च व्रती शिशुः ॥ १८ ॥ स्वाधिमित्रगृहस्थे वा स्वोच्चस्थे तदंशगे ॥ क्रूरांशगो वा शाखेशो धनधान्यसमन्वितः ॥ १९ ॥ शाखाधिपति वारश्च शाखाधिपबलं शिशोः ॥ शाखाधिपतिलग्नं च दुर्लभं तत्र तद्व्रतं ॥ २० ॥ पापांशगे खागते वा दरिद्रो नित्यदुःखितः ॥ तस्माच्छुभांशगे चंद्रे व्रती विद्याविशारदः ॥ २१ ॥ श्रवणादिति नक्षत्रे कर्कराशिस्थे निशाकरे ॥ तदा व्रती वेदशास्त्रे च धनधान्यसमृद्धिमान् ॥ २२ ॥ शुभलग्ने शुभांशे च नैधने शुद्धिसंयुते ॥ लग्ने नैधने सौम्यैः संयुक्ते वा निरीक्षिते ॥ २३ ॥ गुरौ जन्मवार्कचंद्राद्यैः पंचभिर्बलिभिर्ग्रहैः ॥ स्थानादिबलसंपन्नैश्चतुर्भिर्वा शुभान्वितैः ॥ २४ ॥ इदमेवाथ केंद्रेशा स्यान्महादोषविवर्जितं ॥ राशयः सकलाः श्रेष्ठाः शुभग्रहयुतेक्षिताः ॥ २५ ॥ शुभानां राशयस्तथा ग्राह्या स्यात् शुभराशयः ॥ नक्रादिचित्कर्कटांशाः शुभग्रहयुतेक्षिताः ॥ २६ ॥ तस्मात् द्वौ दंद चापांत्य तुलाकन्या राशयः शुभाः

एवंविधेलग्नगतेनवारोव्रतमीरितं ॥२७॥ त्रि३ षडा६ द्य११ गतैःपापैः ष३ ६ शांत्य१२ विवर्जितैः ॥ शुभैः षष्ठाष्ट
८ लग्नो१ स्य१२ वर्जितेनहिमौंजिना ॥२८॥ स्वक्षेत्रे स्वोच्चेपिशीतांशुर्व्रतिनंयदिलग्नगः ॥ तंकरोतिशिशुमतंस्मते
तंक्षयरोगिणं ॥२९॥ चंद्रोदय्येव्रतीशस्तःक्षयरोगीसितेतरे ॥ सितपक्षेबुद्धशास्त्राध्ययनवान्यज्ञकृत्सुखी ॥३०॥
स्फुजितंकेंद्रगेभानौव्रतिनोवंशनाशनं ॥ कुजितंकेंद्रगेभानौभेशिष्याचार्यविनाशनं ॥३१॥ करोतिरुदितेदेवे
संस्थेमंदेतुलागके ॥ लग्नात्केंद्रगतेराहोरंध्रेमातुविनाशनं ॥३२॥ उग्रंकेंद्रगतकेतोवृत्तिर्हंत्ताविनाशनं ॥ पंच
दोषान्तरंलग्नंशुभंदंत्वोपनायने ॥३३॥ ॥इतिनारदसंहितायांमुपनमानाध्यायः॥ ॥ द्विनाव
संतस्त्रतुनाह्नोहेपक्षेगहलग्नेहे ॥ मंदेपराह्नेकोदोषेनपुनःसंस्कारमर्हति ॥१॥ त्रयोदश्यादिचत्वारिसप्तम्यादिदिन
त्रयं ॥ चतुर्थी२पक्षयोरेकाकाप्यावेतोयेगलग्रहाः ॥२॥ चतुर्थीसप्तमीचैवत्रयोदश्यास्तमानतःप्रदोषमपि
कुर्वन्तहु२का१घ०।३०घटिकायदि ॥३॥ षष्ठीचहूदशीचैवअर्धरात्रोननाडिका ॥ प्रदोषमपिकुर्वन्तितत्
नीयाल्प्नननाडिका ॥४॥ त्रयोदशीरात्रिदगादनंतरेस्थितावसार्धप्रहराच्चसप्तमी ॥ यदाचतुर्थीप्रहरांतरेस्थि
तातदाप्रदोषोऽध्ययनेषुदूषकः ॥५॥ वृद्धिसाम्यक्षयेषष्ठित्रि३ चतुः४ पंच५ नाडिकाः ॥ षट्६ चतु४ त्रि३
नि३साधाममध्यायःप्रकीर्तितः ॥६॥ मन्वादिअनाध्यायाःसंति ॥ अजगो२ मृग१० कन्या६ श्वे कर्क४ मीन१२
१

तुला: ७ क्रमात्॥ सूर्यादीनां भवेदुच्चं तस्मान्नीचं तु सप्तमं ७ ॥ ७ ॥ दश १० वह्नि ३ पिंड २८ घस्र १५ शर ५ धिष्ण्य
२७ नखांशै २० शकाः॥ परमोच्चानि सूर्यादेस्थानीचं तु सप्तमं ७ ॥ ८ ॥ परमनीचस्थानानि॥ रवेः ६।१०
इंदोः ७।३ कुजस्य ३।२८ ज्ञस्य ११।१५ गुरोः ९।५ शनेः ०।२० ॥ महद्दशा॥ इनशशिकुजराहुजीवमंद
ज्ञकेतुभृगुजा इति नवानां कृत्तिकादिक्रमेण॥ १२ ॥ षट् सूर्यदशा मता १० श्चंद्रे सप्त ७ संख्या धरासुते॥ रा
हो साष्टदशा १८ श्चैव जीवे षोडश १६ वत्सराः॥ एकोनविंशतिः सौरि १९ बुधे सप्तदशा स्मृता १७ ॥ केतौ च सप्त
षोणिशुक्रे विंशति २० वत्सराः॥ १४ ॥ स्वदशा त्रिगुणीकार्या तद्दशाभिर्हता पुनः॥ स्वाभिर्भि २० विभजेल्लब्धे
शेषं मासदिनानि च॥ १५ ॥ वर्षदशा॥ रविदिन नखस्य संख्या २० श्चंद्रमा व्योमबाणैः ५० क्षितितनयगजाब्धी
४८ श्चंद्रजः षट्शराली ५६ ॥ शनिरसफणसंख्या ३६ वाक्पतिर्नागबाणै ५८ ॥ नयनफगात् ४२ राहुः सप्तति
७० शुक्रसंख्या॥ १६ ॥ खदशा ७० दशा १० फणितानद्दतो नहताधुनः॥ खखागवह्नि ३६० भक्तालब्धं स्यात्तु दि
नादिकं॥ १७ ॥ इति वर्षान्तर्दशा॥ स्वोच्चे सकलफलं ब्रूयात् मित्रक्षेत्रे तदर्धकं॥ शत्रुक्षेत्रे पादफलं स्वल्पं नी
चास्तगे फलं॥ १८ ॥ लग्नाधिपो वा जीवो वा शुक्रो वा यदि केंद्रगः॥ तस्य पुरुषस्य दीर्घायुः धनवान् राजवल्लभः॥ १९ ॥

फाल्गमेहेजन्मतः स्त्रीणां प्रीतिदं पाणिपीडनं सप्तके सामक मेऽरेव्यासये नाशनं तयोः ॥१॥ वधोर्गुरुबलं श्रेष्ठं वर
स्यचरवेर्बलं उभयोग्लौबलं श्रेष्ठं विवाहे च यथोदितं ॥२॥ वटोर्गुरुबलं श्रेष्ठं व्रतबंधे यथोदितं वाचार्यस्य रवेर्ब
लं ॥ उभयोः श्चंद्र बलं श्रेष्ठं व्रतबंधे यथोदितं ॥३॥ गोवर्क कर्कराशिसंस्थस्तु शुक्लपक्षेऽष्टमः शशी ॥ मत्स्यनाशं
करोत्याशु गोचरे शुभकर्मणि ॥४॥ बालस्य बलहीनोपि शांत्यारवेटो बलप्रदः ॥ ग्रहशांतिर्यदा न स्यात्तदा मंग
लं भवेत् ॥५॥ यथोक्तवत्सरे कार्यमनुक्तेनोपनायनं ॥ कन्यायां श्चविधिश्चायमन्यथा मरणं ध्रुवं ॥६॥ चापमी
नकुलीरस्थश्चाष्टमोपि शुभो गुरुः ॥ नक्रगश्चायगो ११ नेष्टो गोचरे शुभकर्मणि ॥७॥ माघफाल्गुन वैशाख
ज्येष्ठमासाः शुभावहाः ॥ मध्यमः कार्तिको मार्गशीर्षो विनिंदिताः परे ॥८॥ माघादिपंचमासेषु व्रतबंधः स
उच्यते ॥ शिवमेत्वगते सूर्ये तदूर्ध्वं नैव कारयेत् ॥९॥ अश्विन्यादिषु सर्वेषु मौंजीबंधः प्रशस्यते ॥ वर्जयित्वा म
घाज्येष्ठा विशाखा यम कृत्तिकाः ॥१०॥ हस्तत्रय श्रवणसार्प शिव वक्षे र्ववाम्लश्च बह्वृच वटोपयने प्रशस्तं ॥ तिष्या
दितिद्रुहिण सूर्य शशांक पौष्ण मैत्रोत्तराणि यजुषां व्रतसंनिबंधः ॥११॥ वस्वाश्विविष्णुदितिपुष्यकरोत्तरासु
विधार्यदा व्रतविधिः खलु सामगानां ॥ मैत्राश्विविष्णुदितिपुष्यकरेंदुभेषु यसैर्व्रतैर्यतरथर्वविधिः प्रशस्ता

१२ तारा चंद्रानुकूलेषु ग्रहादेशुभे ऽपि । पुनर्वसौ कृतो विप्रः पुनः संस्कारमर्हति ॥ १३ न कदाचिद्द्वादशे ऽब्दे शुभा
नोराशिप्रवेशनात् ॥ विवाहं देवतानां च प्रतिष्ठां चोपनायनं ॥ १४ अप्रबुद्धे हृषीकेशे यावत्तावन्न मंगलं ॥ उत्स
वे वास्तुदेवस्य दिवसे नान्यमंगलं ॥ १५ ॥ नास्तंगते गुरौ शुक्रे न तयोर्बालवृद्धयोः ॥ न गुरौ सिंहराशिस्थे सिंहां
शके गते ऽपि वा ॥ १६ पश्चात्प्राग्उदितः शुक्रो दश१० त्रि३ दिवसं शिशुः ॥ वृद्धः पंच५ दिनं पक्षं१५ गुरुः पक्षं तु
सर्वदा ॥ १७ ॥ न जन्ममासे जन्मर्क्षे न जन्मदिवसे तथा ॥ नाद्यगर्भस्तु तस्याथ दुहितुर्वा करग्रहः ॥ १८ ॥ नैवोद्वा
हो ज्येष्ठपुत्रीपुत्रयोश्च परस्परं ॥ ज्येष्ठमासे तयोरेको ज्येष्ठः श्रेष्ठश्च नान्यथा ॥ १९ ॥ मघामृगशिरोहस्तः स्वा
तीमूलश्च मैत्रभं ॥ रेवती रोहिणी चैव उत्तराणां त्रयं तथा ॥ २० ॥ ॥ इति विवाहतारा ॥ त्रि३ षडा६ य
११ गतैः पापैः ष६ड३सां८त्य८ विवर्जितैः ॥ शुभैः षष्ठा६ष्ट८ह्यां१त्य१२ वर्जितेन हिमांशुना ॥ २१ ॥ यथा१२
लग्ने८ षष्ठ६गाः शुक्रो लग्नपे हषड६ष्टमौ८ ॥ जीवोष्टम८गोभौ क्रूरो वटोः प्राणापहारकः ॥ २२ ॥ कर्मस्थ१० सूर्य
त्रि३ धना२ स्त७ कर्म१० गश्चंद्र षष्ठाः६ शनिराहुभौमाः ॥ सर्वे त्रि३ लाभे११ धन२ केंद्र१।४।७।१० कोण५।९ गाः
बुधगुरुशुक्राः शुभास्युर्व्रतबंधकाले ॥ २३ ॥ चतुर्थे४ बुधगुरुशुक्राः ७ राम चाद्यं१ केंद्रस्थानं तु सप्तमं७ ॥ पं

ना॰ ज्यो॰
॥४॥

समं नवमं ५।९ स्तेयं त्रिकोणं तु तनोः क्रमात् ॥ २४ ॥ पंच ५ बलिभिर्लग्नेयैं दृष्कैः शुभखेचरैः ॥ चतुर्भिर्वायफतं लग्नं
शुभदं सर्वकर्मसु ॥ २५ ॥ उग्रात्यष्टमर्यादीक्षस्येत्याषष्ठतः ॥ आषष्ठतः १।२।३।४।५।६ ख्याः नवमा ९ य ११ यगता
श्च बुधगुरुस्तु शुक्रोः शस्ताः षडाद्य ११ सहजा ३ ष्टम ८ मेषु पापाः ॥ पाणिग्रहे त्रि ३ सुख ४ लाभ ११ धनेषु चंद्रः ष
ष्ठः ६ सितो निधनगो ८ न शुभो महीजः ॥ २६ ॥ त्रि ३ षडा ६ या ११ याष्टगैः पापैः सप्ता ७ ष्टा ८ न्त्य १२ विवर्जितैः ॥
शुभैः षष्ठा ६ ष्ट ८ लग्ना १ न्त्य १२ वर्जिते न हिमांशुना ॥ २७ ॥ लग्नस्थोऽरिगृहाधीशो मृत्युप्रो मरणप्रदः ॥ विवाहादि
षु शैले षु यात्रायां सर्वकर्मसु ॥ २८ ॥ षड ६ ष्ट ८ पो वा लग्नेशो एको वा मित्रतां गतः ॥ यदा तदा न दोषाय लग्नस्थो
ऽप्यशुभप्रदः ॥ २९ ॥ अजगोमृगकन्याश्च कर्कमीनतुलाः क्रमात् ॥ सूर्यादीनां भवेदुच्चं तस्मान्नीचं तु सप्तमं
॥ ३० ॥ अस्तगा नीचगाः शत्रुराशिगाश्च पराजिताः ॥ न शक्ताः स्वफलं दातुं दानमस्त्रो त्रियेयथा ॥ सिंहस्या
धिपतिः सूर्यः कर्कटस्याधिपः शशी ॥ मेषवृश्चिकयोर्भौमः कन्यामिथुनयोर्बुधः ॥ ३२ ॥ मीनधन्वोर्गुरु
श्चैव तुलावृषभयोः सितः ॥ घटनक्रद्वयोः सौरिः शशिनाथाः प्रकीर्तिताः ॥ ३३ ॥ सूर्येंदुभौमगुरवो बुधभार्ग
वसूर्यजौ ॥ मिथुनो मित्राः सूर्यबुधो मित्रो मतं हृत्सुहृदस्य ॥ ३४ ॥ उदासीनो सुरेजीवाकः मिथुनो भावस्तु मित्रो
उदासीनं वैराभावं मित्रारित्वं समं विदुः ॥ ३५ ॥ राहुदोषं बुधो हंति बुधदोषं शनैश्चरः शनिदोषं कुजो हंति कुज

शिव
॥४॥

दोषंतु भार्गवः भृगुदोषं गुरुर्हंति गुरुदोषंतु चंद्रमाः ॥ चंद्रदोषं रविर्हंति रविदोषंतु चंद्रमाः ३८ ॥ राहुदोषं बु
धं हंति बुधदोषं शनैश्चरः ॥ त्रयाणां भूमिजो हंति चतुर्णां तु भृगोः सुतः ॥ पंचानां देवमंत्री च षण्णां हंति चंद्रमाः
सर्वेषां दोषान्रविर्हंति यदि वै बलवान्ग्रहः ॥ ३९ ॥ सग्रदैवतग्रहप्रवेशने भे स्वलाकेतुरग्रहे करग्रहे शुभ च ॥ वर्तमा
नतिथेरेव पंचकेऽन्यत्र पंचकतिथिर्गता वृथा ॥ ४० ॥ हर्म्ये शुभयात्राव्रतबंधने शुभेषादिलग्नतिथिवर्तमानं ॥ अन्ये
षु कार्येषु गतप्रमाणं स्याद्दिलग्नतिथिपंचके स्यात् ॥ ४१ ॥ अष्टतर्कनवतर्कमार्गणाकाशवेदरसचराग्रथो ३९
४०५९९९८ हताः ॥ स्युर्नखांकशरलोचनैः क्रमात्पंचकादिषु सहस्रसंगुणैः २५९२०००० ॥ ४२ ॥ पंचद
श भवेद्रोगो १५ द्वादश १२ स्याद्धुताशनः ॥ दश १० राजा वसु ८ श्चौरः सागरो मृत्युदो ध्रुवः ॥ ४३ ॥ तिथिंवारैश्च
नक्षत्रं लग्नं श्रावकमिश्रितं ॥ नवभिस्तु हरेर्भागं शेषं पंच ५ च पंचकं ॥ ४४ ॥ अन्यमते ॥ गततिथियुतं तल
ग्नं नवभिर्भागमाहरेत् ॥ एके १ मृत्युर्द्वयो २ र्वह्निश्चतुर्थे राजपंचकं ॥ षष्ठे ६ चौरोऽष्टमो ८ रोगो पंचकं परिवर्जयेत् ॥ ४५
अस्यापवादः ॥ रोगं चौरं त्यजेद्रात्रौ दिवा राजाग्निपंचकं ॥ संध्ययोर्मृत्युदं त्याज्यं पंचकं सर्वकर्मसु ॥ ४६ ॥ व्रतरोगपथे चौ
रं ग्रहगो पाग्निमेव च ॥ राजदर्शन रात्रं च विवाहे मृत्युपंचकं ॥ ४७ ॥ सदार्के वारे त्यजेद्रोगपंचकं सोमे च राजः क्षितिजे

त्रिपंचकं ॥ गुरौ तु चोरस्य भृगौ मृतिप्रदं बुधे शनौ पंचकदुष्टतानहि ॥ ४८ ॥ ॥ इति पंचकं ॥ ॥ अथ महद्दोषाः ॥ पंचांग
शुद्धिरहितो दोषस्त्वाद्यः प्रकीर्तितः ॥ उदयास्तशुद्धिहीनो द्वितीयः सूर्यसंक्रमः ॥ तृतीयः पापषड्वर्गो ४ भृगः षष्ठः ६
कुजोऽष्टमः ८ ॥ गंडांत ७ कर्तरी ८ रिःफषडष्टेंदु ९ श्च सग्रहः ॥ १० ॥ दंपत्योरष्टमं लग्नं राशि ११ र्विषघटी भवः १२ ॥ दुर्मुहूर्तो
१३ वारदोषः १४ खार्जूरीकः समांघ्रिजः १५ ॥ ग्रहणोत्पातभं १६ क्रूरविद्धर्क्षं १७ क्रूरसंयुतं १८ ॥ कुनवांशो १९ महापा
तो २० वैधृति २१ श्चैकविंशतिः ॥ ४ ॥ अथ पंचकशुद्धिः ॥ तिथिवारर्क्षयोगानां करणस्य च मेलनं ॥ पंचांगमिति शु
द्धिः स्यात्पंचांगस उदाहृतः ॥ यस्मिन्पंचांगदोषाः स्थितस्मिल्लग्नं निरर्थकं ॥ ५ ॥ या तिथिर्वासराणां हि त्रयं स्पृशति निंदि
ता ॥ तिथीनां त्रितयं वारः स्पृशत्येकः स निंदकः ॥ ६ ॥ शुक्लाद्यामावमा रिक्ता सर्वकर्मसु हानिदा ॥ ७ ॥ चतुर्थ्यष्टमि
की रूपा नवमी सर्पिणी तथा ॥ चतुर्दशी नदी रूपा आद्यापाद्यमध्यमांस्त्यजेत् ॥ ८ ॥ नंदा भद्रा जया रिक्ता पूर्णाः स्युः ति
थयः क्रमात् ॥ शुक्लेऽल्पतः शुभाः पापो कुजोऽर्कश्चापरो समौ ॥ ९ ॥ ब्राह्मणौ भार्गवाचार्यौ क्षत्रियौ रविमंगलौ ॥
वैश्यः सोमो बुधः शूद्रः शेषास्ते चांत्यजः स्मृताः ॥ १० ॥ सौम्यस्य वारे शुभकार्यकं न्यादुष्टान्विताऽनिष्टफलाय पाप
नंदा जया भद्रा तिथौ च सर्वे सौख्यं च रिक्ता सूक्तथा विपत्तिः ॥ ११ ॥ आद्यस्याद्यास्त्रयो २ नाड्यः षष्ठ्यां ९ गंडांतिगंडयोः

भरलुस्याक्ष ५ मिता स्माज्यानं दीर्घ्या घात वज्रयोः॥ परिघस्य च दर्शार्धं व्यतीपातश्च वैधृतिः॥ १२ सर्वकर्मसु कल्याणी
शुभा नो कामनीषिभिः॥ १३ भद्रारूपं॥ सर्पिणी वृश्चिकी भद्रा दिवा रात्रौ प्रकीर्तिता॥ सर्पिण्या वदनं त्याज्यं वृश्चिक्याः
पुच्छकं तथा॥ १४ भद्रामुखं॥ अकारादि व्यंजनाक्षराणि॥ अकारादिषोडशावराः॥ शु ५ आ ८ ट ११ णी १५ सि
ते पक्षगे र छि १२ ग्र १६ द १४ सितेतरे॥ व्यंजनैस्थितयो ज्ञेयाः स्वरैस्तु प्रहरो ह्रिशाः॥ १५ विष्टेर्मुखे घटीपंच ५ कंठे
द्वे २ हृदये दश १० नाभौ पंचके ५ टौ पंच ५ पुच्छे तिस्र ३ स्तत फलं॥ १६ कार्यहानि मृतिर्दुःखं बुद्धिनाशं कलयहः फलं क्रमेण
सर्पिण्याश्च वृश्चिक्याश्च क्रमेण तु॥ १७॥ भद्रावासः॥ कंन्यातुलामकरधन्विषु नागलोके मेषालिमिथुनवृषेषु सुरालये च
मीनसिंहघटकर्कटके शुभमर्त्ये चंद्रे वदंति मुनयो विविधां च विष्टिं॥ १८ पूर्णा हिम्यो १५ ८ दिवा रात्रौ चतुर्थ्येकादशी दि
ने ४।११ व्येका १ शुनालो कृष्णपक्षे १४।७ ३।१० तास्तु भद्रा यथोदिता॥ १९॥ नंदा विष्टिः शुभा येव कमलासनभाषितं
अस्यापवादः॥ दिवापरार्धजा विष्टिः पूर्वार्धस्था यदा निशि॥ २०॥ संमतं वचनं॥ कृष्णतृतीया ३ दशमी च रात्रौ १० सासप्त
मी ७ भूत १४ दिवा च भद्रा एकादशी ११ नेक्रमतश्चतुर्थ ४ शुक्लाष्टमी पूर्ण ८।१५ दिवा च भद्रा॥ २१॥ दिवाभद्रा यदा रा
त्रौ रात्रिभद्रा यदा दिवा विपरीता यथा भद्रा सा भद्रा मंगलप्रदा॥ २२॥ ॥ अथोदयास्तशुद्धिः॥ लग्नलग्नांशकौ स्व
स्वपतिना वीक्षितौ यकौ नवेंद्वान्योन्यपतिना शुभमित्रेण वाथवा॥ वरस्यमृत्युः स्यात्ताभ्यां समसप्तोदयांशको॥ एवं तो

ना॰ सं॰ ज्यो
॥ ६ ॥

वीक्षितश्चेतो भस्कर्वधाः करग्रहे॥ २४॥ पापदृष्ट्या विहीनांशोऽक्रमयक्तोऽशुभप्रदः॥ क्रूरदृष्ट्या फलंत्वंशो क्रूरश्चक्रो प्रतिप
दः॥ २५॥ पादेकदृष्टिर्दशमत्तृतीये १०।३ द्विपाददृष्टिर्नवपंचमे च ९।५ त्रिपाददृष्टिश्चतुरष्टके च ४।८ संपूर्णदृष्टिः
सप्तमसप्तके च ७॥ २६॥ स्वस्थानादिति शेषः॥ पाददृष्ट्या बलिर्मंदो त्वर्धदृष्ट्या बलि र्गुरुः॥ त्रिपादबलवान् भौमः संपूर्णाः
सकला ग्रहाः॥ २७॥ यस्मिन्राशौ स्थिते चंद्रे तदंशो यद्दिदीयते॥ तस्माद्भवति वेधश्च यं आवर्षान्मुनयो जगुः॥ २८॥ नाल्प
साधिनाथोऽथ नवांशनाथोऽष्टाष्ट ९।८ मेवायदि लग्नकाले॥ स्वप्नेऽपि नो पश्यति वामनो मुखं विचर्चितं कुंकुमकर्द
मेन॥ २९॥ अथ संक्रांतिः॥ त्याज्याः सूर्यस्य संक्रांतेः पूर्वतः परतः सदा॥ विवाहादिषु कार्येषु नाड्यः षोडश १६
षोडश १६॥ ३०॥ अथ षड्वर्गशुद्धिः॥ त्रिंशांशा गालग्ने ७ होरातत्स्यार्धं १५।१५ उच्यते॥ लग्नत्रिभागो १०।१०।१० द्रेष्का
णः नवांशो ३।२०।३।२०।१४०।१०।०१३।२०।१६।४०।२०।०॥२३।२०।२६।४०॥३०॥ नवमांशकः॥ द्वादशो २।३०॥५।०॥७
३०॥१०।०॥१२।३०।१५।०॥१७।३०।२०।०॥२२।३०॥२५।०॥२७।३०॥३०।० द्वादशांशास्त्रिंशांशा १ त्रिंशदंशकः॥ ३१॥ य
दास्याल्लग्नपः सौम्यैव गीर्घः शुभदः स्मृतः॥ होरे केंद्रोर्वोजराशौ समभे सूर्यचंद्रयोः॥ द्रेष्काणाः स्युर्लग्न १ पंच ५ नवरा
शीश्वरा ९ क्रमात्॥ मेषाद्यानवपर्यायान्नवांशाः स्युः क्रमेण तु॥ आरभ्य लग्नराशेस्तु द्वादशांशेश्वराः क्रमात्॥ ३४॥ अथ त्रि
शांशाः॥ कुजार्कि ज्यज्ञशुक्राणां बाणा ५ ष्ट ८ ष्टा ८ द्रि ७ मार्गणाः ५ भागाः स्युर्विषमे ते तु समराशौ विपर्ययात्॥ ३५॥ ष

शिव
॥ ६॥

11

सूर्ये शुभदः प्रोक्तो विवाहस्थापनादिषु ॥ षड्वर्गः पंचवर्गो वा ६।५ चतुर्वर्गः शुभावहः ॥ ३६ ॥ तृतीयः शुभदः प्रोक्तो
केंद्रकोणस्थिते शुभे ॥ केंद्रस्थेपि शुभे खेटे द्वे वर्गे ३।१ तनुं त्यजेत् ॥ ३७ ॥ दृष्टि चंद्रः शुभाभ्यां हि पापाभ्यां क्षय चंद्रमाः
ग्रहयुक्तस्तु पापाभ्यां न युक्तः शुभदो ग्रहैः ॥ ३८ ॥ मेषसिंहधनुर्जेष्वजादयस्तौलिकुंभमिथुने तुलादयः ॥ कन्यका
वृषमृगे मृगादयः कर्कवृश्चिकझषे कर्कटादयः ॥ ३९ ॥ तुलमिथुनकन्यांशा धनुराद्यर्धसंभृताः ॥ एतेन वांशास्तकोशाः
शुभे प्रोक्तो हि गोऽसषो ॥ ४० ॥ भृगुः षष्ठः ॥ भृगुः षष्ठांकयो दोषाल्लग्नात् ४६ गते सिते ॥ उच्चगे शुभसंयुक्ते तल्लग्नं सर्वदा
त्यजेत् ॥ ४१ ॥ कुजाष्टमः ॥ कुजाष्टमो महादोषो लग्नादष्टमगे कुजे ॥ शुभत्रययुतं लग्नं त्यजेत्तं तुंगगे यदि ॥ ४२ ॥ गं
डांतं ॥ पूर्णानंदाख्ययोस्तिथ्योः संधिर्नाडीद्वयं त्यजेत् ॥ गंडांतं मृत्युदं जन्मयात्रोद्वाहव्रतादिषु ॥ ४३ ॥ सार्पेंद्रपौष्ण
धिष्ण्यांत्यषोडशांशभशोभसंधयः ॥ तदग्रमेषाद्यपादपादो गंडांतसंज्ञकः ॥ ४४ ॥ कुलीरकीसिंहयोः कीटचापयोर्मी
नमेषयोः ॥ गंडांतमंतरालं स्याद्घटिकार्धं मितिप्रदं ॥ ४५ ॥ नक्षत्रतिथिलग्नानां गंडांतं त्रिविधं स्मृतं ॥ नवपंचचतुर्थानां
द्वे २ का १ र्धघटिकाः १२ स्मृताः ॥ ४६ ॥ कर्त्तरी ॥ उग्राभिमुखयोः पापग्रहयोर्ऋजुवक्रयोः ॥ साकर्त्तरीति विज्ञेया दंपत्योर्गल
कर्त्तरि ॥ ४७ ॥ पृष्ठस्थितो ग्रहो मार्गी वक्रगो यस्थितो यदा ॥ तदा तु कर्त्तरी ज्ञेया वैपरीत्ये शुभावहा ॥ ४८ ॥ कर्त्तरी दोषदुष्टं
यल्लग्नं तत्परिवर्जयेत् ॥ अपि सौम्यग्रहैर्युक्तं गुणैः सर्वैः समन्वितं ॥ ४९ ॥ रिःफषडष्टगेंदुः षडष्ट ६।८ रिःफगेचंद्रे १२ लग्ना
द्दोषसंज्ञतः ॥ तल्लग्नं वर्जयेद्धीमान् जीवशुक्रसमन्वितं ॥ ५० ॥ उच्चगे नीचगे वापि मित्रगे शत्रुराशिगे ॥ अपि सर्वगुणा

ना॰सं॰ज्यो॰
॥७॥

पेतं दंपत्योर्निधनप्रदं ॥ ५१ ॥ सग्रहः ॥ राशौ कोग्रहसंयुक्तो दोषः सग्रहसंज्ञकः तस्मिन्सग्रहदोषे तु विवाहो नैव कारयेत् ॥ ५२ ॥ सूर्येण संयुते चंद्रे दारिद्र्यं भवति ध्रुवं ॥ कुजेन मरणं विंद्यात्सौम्येन त्वनपत्यतां ॥ दौर्भाग्यं गुरुणा युक्ते सापत्न्यं भार्गवेण तु ॥ प्रवज्या सूर्यपुत्रेण राहुणा कलहं तथा ॥ केतुना संयुते चंद्रे नित्यं कष्टं दरिद्रता ॥ पापद्वययुते चंद्रे दंपत्योर्मरणं भवेत् ॥ ५५ ॥ शुभग्रहयुते चंद्रे स्वोच्चगे मित्रराशिगे ॥ दोषाय न भवेल्लग्ने दंपत्योः श्रेयसे तदा ॥ ५६ ॥ स्वक्षेत्रगः स्वोच्चगो वा मित्रक्षेत्रगतोपि वा ॥ पापग्रहयुतश्चंद्रो करोति मरणं तयोः ॥ ५७ ॥ नक्षत्रसग्रहो दोषो न दोषो राशिसग्रहः ॥ केचिद्वदंति मुनयो त्रीं गिराभ्यां शुभः शशी ॥ ५८ ॥ दंपत्योरष्टमं लग्नं राशिः ॥ दंपत्योरष्टमे लग्ने त्वष्टमो राशिलग्नतः ॥ यदि लग्नगतः सोपि दंपत्योर्मरणप्रदः ॥ ५९ ॥ सा राशिः शुभयुक्तोपि लग्नं वा शुभसंयुतं ॥ लग्नं विवर्जयेद्यत्नात्तदंशांश्च तदीश्वरान् ॥ ६० ॥ तथा ॥ दंपत्योर्द्वादशं लग्नं राशिर्वा यदि लग्नतः ॥ अर्थहानिस्तयोर्यस्मात्तदंशं स्वामि नं त्यजेत् ॥ ६१ ॥ जन्मराश्युक्रमं नेव जन्मलग्नोदयं शुभं ॥ तयोरुपचयः ३।६।१०।११ स्थाने यदि लग्नगतं शुभं ॥ ६२ ॥ राश्याधिपस्य लग्नेशश्चैको हि मित्रतां गतः ॥ यदा तदा न दोषाय स्यादष्टमं तु तनुर्भवेत् ॥ ६३ ॥ दंपत्योर्जन्मराशिस्थं चाष्टमं शं परित्यजेत् ॥ लग्नराशीयो मैत्री यदा स्यान्नु तदा शुभं ॥ ६४ ॥ विषघटीभावः ॥ खमार्गणाः ५० वेदपक्षाः २४ खरामाः ३० व्योमसागराः ४० । वाधिसंज्ञा १४ स्पदस्ताः २१ खरामाः व्योम ३० ५० बाहवः २ ॥ द्विरामाः ३२ खाग्नयः ३० अस्यद

शिव
॥७॥

स्रा: कुंजरभ्रमघ: १८ ॥ रूपपक्षा २१ व्योमदस्रा २० वेदचंद्रा १४ श्चतुर्दश १४ ॥ शून्यचंद्रा १० वेदचंद्रा: १४ षड्गुणा ५६
वेदबाहव: २४ ॥ शून्यदस्रा: २० शून्यचंद्रा: १० शून्यचंद्रा १० गजेंदव: १८ ॥ तर्कचंद्रा १६ वेदपक्षा: २४ स्वरामा ३७ श्चाश्विभा
क्रमात् ॥ एभ्य: परास्तु श्रुतयो ४ नाडिका विषसंज्ञिता: ६८ ॥ विवाहादिषु कार्येषु विषनाड्यश्च वर्जयेत् ॥ यदि लग्नगतो
जीवस्तदा मस्रकं विनिर्दिशेत् ॥ ६९ ॥ गतैष्यनक्षत्रघटीयोगोनघ्नो विषध्रुव: ॥ खरसा ६० प्तफलं योज्यं पूर्वर्क्षे घटिकाध्रुवे
७० ॥ षष्ठेहश्नात्मवे दिनेत्वधिकाद्य परेहनि ॥ तत्रापि दिनमानाच्च न्यूनाधिकादिवानिशि ॥ ७१ ॥ दुर्मुहूर्ता: ॥ भास्करा
दिषु वारेषु मुहूर्ताश्चातिनिंदिता: ॥ विवाहादिषु ते वर्ज्या अपि लग्नगुणैर्युता: ॥ ७२ ॥ शाको ०१४ का कौ ०१२ कृताश्च
श्चो ४।१।१० सूर्यगि १२।६ नंदसागरे ९।४ ॥ कुपक्षौ १।२ दिवसा वर्ज्या: रवा० ९८ सप्त ७ ख० खा० ९८ भू: १ ॥ रात्रावेते
दु:क्षणाश्च सूर्यवारादिषु क्रमात् ॥ द्वितीयो दु:क्षणो ज्ञेयो कुलिको दिवसस्य तु ॥ ७४ ॥ बुधान्तु कंटको ज्ञेयो कालवेला
गरोस्तथा ॥ यमघंट: शुक्रवाराद्दु:क्षणा: स्यु: क्रमेण तु ॥ ७५ ॥ वारदोषा: ॥ युगानि ४ सप्त ७ द्वौ २ बाण ५ गजा ८ रा
मा ३ रस: खलु ॥ अर्धयामास्तु विज्ञेया: सूर्यवारादिषु क्रमात् ॥ ७६ ॥ अहर्निश गजा ८ श्चास्या द्दिनेशादिका नोभव
ति वगरु भौमसा र्केषु वा: क्रमेण ॥ प्रभवति यमघंट: कंटक: कालवेला कुलिक इति विरुद्धस्तत्परार्धं निषिद्धं ॥ ७७ ॥
शनेस्तु कुलिको ज्ञेयो यमघंटो गुरोस्तथा ॥ भौमात्तु कंटको ज्ञेयो कालवेला च चंद्रजात् ॥ ७८ ॥ निंदिता वारदोषा ये

ना॰ सं॰ ज्यो॰
॥ ८ ॥

सूर्यवारादिशुक्रमात् ॥ अपि सर्वगुणोपेतास्ते वर्ज्याः सर्वमंगले ॥ ७९ ॥ यमघंटो दिवा नेष्टो निशायां कुलिकस्तथा ॥ अ
र्धयामो दिवारात्रौ सर्वकर्मसु निंदकः ॥ ८० ॥ खार्जूरीकः समांघ्रिजः ॥ खार्जूरीकः समांघ्रिश्चेत्तत्र लग्नं विवर्जयेत् ॥ अ
पि शुक्रेऽन्यसंयुक्ते विषसंयुक्तदुग्धवत् ॥ ८१ ॥ योगांके विषमं सैकं समं सवसुलोचनं ॥ २८ ॥ दली कृत्वाश्विनीपूर्वं विंध
देकार्गलाभिधः ॥ ८२ ॥ एकाकार्याकूर्ध्वरेखा तिर्यग्रेखात्रयोदश ॥ १३ ॥ विष्कंभशूलगंडेषु दस्रेंदुमूलभानि वै ॥ ८३ ॥ व्याघा
तवज्रपरिघातिगंडेदितिभहूयं ॥ मघानुराधे शीर्षे भं तत्तोष्णा विंशभानि वै ॥ ८३ ॥ न्यसेत्तत्रैकरेखास्थो चंद्रार्को हि
समांघ्रिजौ ॥ तदा स्यैकार्गलो दोषो मुनिभिः परिकीर्तितः ॥ ८४ ॥ अन्यच्च ॥ विरुद्धनामयोगेषु साभिजिद्विषभ-टक्षके
अर्कादिंदुस्तदा भं च विंधादेकार्गलाभिधः ॥ ८५ ॥ ग्रहणोत्पातभं ॥ ग्रहणोत्पातभं त्याज्यं मंगलेषु ऋतुत्रये ॥ यावच्च
रविणा भुक्तो भुक्तं तद्दग्धकाष्ठवत् ॥ ८६ ॥ सर्वग्रासे तु षण्मासांस्त्रीन्मासान् खंडग्रहे ॥ अपाद ग्रहणे धिष्ण्यं मासमे
कं विवर्जयेत् ॥ ८७ ॥ प्रसंगात् ॥ उत्पातग्रहणे सप्त सप्ताहरखिलग्रहे ॥ नाखिले त्रिदिनं नेष्टं नेष्टं तद्भमतुत्र
ये ॥ ८८ ॥ ग्रस्तास्ते त्रिदिनं सर्वं पश्चाद्रक्तोदये तथा ॥ संध्यायां तु त्रि त्रिदिनं निःशेषे सप्त सप्त च ॥ ८९ ॥ क्रू
रविद्धं ॥ मंगलेषु त्यजेत्क्रूरविद्धर्क्षं क्रूरसंयुतं ॥ अखिलर्क्षं पंचगव्ये सुराबिंदुयुतं यथा ॥ ९० ॥ पाद एव शुभे वि
द्धस्त्वशुभं नैव पादतः ॥ क्रूरविद्धयुतं धिष्ण्यं निखिलं नैव पादतः ॥ ९१ ॥ वेधमाघंसयो ॥ १ ॥ वरं ध्योरन्योन्यं द्वित्तीय

शिव
॥ ८ ॥

वे

णि ॥ ११७ ॥ उरगं पित्र्यं भं त्वाष्ट्रं मैत्रं विष्णुं च पुष्यभं ॥ दिवाकरस्थनक्षत्राद्धसंख्याकं भवेत्तथा ॥ ११८ ॥ तत्संख्ययाऽश्विभा
द्गणयेत् सूर्यभात् खंडादिकं धनकं मात ॥ स्वखंडादिकं धिष्ण्यं शुभे कर्मणि संत्यजेत् ॥ ११९ ॥ दोषयुक्तं च नक्षत्रं खंडस्थं कोणितं तथा
॥ भो म्योज्झितं च शुभदं शुभकार्येषु सदा ॥ १२० ॥ कुजाद्य ८ दोषभंग षट्क ६ दोषं च धावटोरस्य भल गदोषं ॥ गंडांत दोषं
कुलिकादिदोषं सर्वं हरत्रिषडाय गो रवि ॥ १२१ ॥ ॥ संवत्सरे १८ पराभव ॥ इदं पुस्तकं शुभ [illegible] लिखितं शिवरामेण लि
खितं ॥ ॥ शुभमस्तु ॥ ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ ॥ श्री ॥ शुभं भवतु ॥ छ ॥